IJCRT.ORG ISSN : 2320-2882
INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# वाक्-तत्त्वं शाक्तपरम्परायां च तत्साधनाविधिसमीक्षणम्

Tej Prakash,
Research Scholar,
Department of Sanskrit,
University of Delhi, Delhi, India

**शोधसारः-**

भारतीयज्ञानपरम्परा निगमागममूला। निगमः वेदः, आगमाश्च तन्त्राणि भवन्ति। आगमाः शिवपार्वतीसंवादमाश्रयन्ते। अस्मिन्नेव क्रमे शैवशाक्ततन्त्रपरम्परा वर्त्तते। तन्त्राणि साधनाप्रधानानीति लोके विज्ञायते। निगमपरम्परायां बहुधा वाक्-स्वरूपं प्रतिपादितम्। तद्यथा प्रयोगशालां विना वैज्ञानिकाः विज्ञाने प्रौढतां नाप्नुवन्ति तथैव साधनां विना साधकः साध्यं नाप्तुं शक्नोति। तस्मात् वाक्तत्वं प्रकाशयन् शाक्ताभिमतवाङ्मीमांसनायायं लेखप्रक्रमः।

**विशिष्टशब्दाः-**

वाक्, शाक्त, मद्य, मांस, साधना।

**प्रास्ताविकम्-**

भारतीयाज्ञानपरम्परा अद्यापि जनान् ज्ञानप्रवाहेण तोषयति। स्वसाध्यसाधनतत्परः जनः अस्मादेव लक्ष्यं साधयति। आगमाः शिवपार्वतीसंवादानाश्रयन्ते। इमे प्रमाणत्वेन स्वीक्रियन्ते निगमवदेव। शाक्ततन्त्रदर्शनं शक्तिप्रधानम्, अद्वैतसाध्यं साधनाप्रधानञ्च। वाक्-शक्तेः सम्यक् स्वरूपमत्र विविक्तम्। अस्मिन् दर्शने शक्तिप्राधान्यात् वागेव तस्य स्वरूपम्, तस्याः स्पन्दनेन सकलसृष्टिः संकुचितदशात्वेन विवर्त्तते।

**विषयवस्तुप्रतिपादनम्-**

सर्वादौ तावद् केयं वागिति?

उपर्युक्तप्रश्नसमाधातुं वैयाकरणसरणिमनुसरन् नैरुक्तपरम्परामपि गच्छामश्चेत् प्राप्यते वक्ति इति वाक्। "वच परिभाषणे" धातो: वाक्-शब्दनिष्पत्तिर्भवति। अस्मज्ज्ञानपरम्परायां वाग् हि सर्वस्य मूलं प्रत्यपादि। ऋग्वेदे वाक् ब्रह्मत्वेन तत्त्वरूपेण च स्वीक्रियते।[i] किञ्च तत्त्वमिति चेत् तस्य भावस्तत्त्वमिति।[ii] तस्य ब्रह्मण: स्वस्य रूपमिति भाव: तत्त्वस्य।

ऋग्वेदस्य दशममण्डलस्य पञ्चविंशत्युत्तरशततमे सूक्ते वागाम्भृणीये वाक्-तत्त्वस्य स्वरूपविवेचनं सम्यक् विविक्तम्। इयं वाक् सर्वत्र क्षणे-क्षणे कणे-कणे च व्याप्तेति। वाक् चेतनाचेतनेषु संदर्शिता।[iii] शतपथब्राह्मणे वागेव सृष्टे: कारणम्।[iv] सैव नित्यानित्यपदार्थरूपिणी, भोक्त्री, भोग्या चास्ति।


निघण्टुकार: वाच: सप्तपञ्चाशत् नामानि करोति। नैरुक्त: महाभाष्यकृच्च ऋग्मन्त्रप्रस्तुतिं कुरुत:-

चत्वारि शृंगास्त्रयोऽस्य पादा: द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधाबद्धो वृषभो रोरवीति महो देवो मर्त्यॉं आ विवेश॥[v]

चत्वारि वाक्[vi] परिमिता पदानि तानि विदुर्ब्राह्मणा: ये मनीषिण:।
गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या: वदन्ति॥[vii]

वाचश्चातुर्विध्यमाभ्यां मन्त्राभ्याम् आचार्यसायणात् प्राक् न कोऽपि व्याख्याकारो निर्दिशति।

ततः शब्दसृष्टिर्वीक्ष्यते-




वाक्-शब्दयोः वाक् सवाक्सृष्टेः अन्तः सन्निविष्टं स्वपरबोधकं चित्तत्त्वं वर्त्तते। उच्यते च-

**अपि प्रयोक्तुरात्मानं शब्दमन्तरवस्थितम्।**

**प्राहुर्महान्तमृषभं येन सायुज्यमिष्यते॥**[viii]

अर्थात् वाक्-तत्त्वं महतः ऋषभस्य आत्मचैतन्यम् अन्तरवस्थितम्। अत एव कदाचित् शब्दस्य वाचश्च अभिन्नता आभाति। इमामाश्रित्य कृतोऽर्थः वाचश्चातुर्यमासादयति।

प्राप्तायां परम्परायामस्यां भर्तृहरेः प्राक् न कश्चन् वाक्-स्वरूपं प्रस्तूयमानो दृश्यते। वैयाकरणनिकाये वाचश्चातुर्यं स्वीक्रियते, परा-पश्यन्ती-मध्यमा-वैखरीति। वाक्यपदीयस्य माङ्गलिककारिका परावाक्-स्वरूपं प्रस्तौति।[ix] अनेन आदिनिधनाभ्यां विरहितेन शब्दतत्त्वेन ब्रह्मणा जगतः प्रक्रिया अर्थभावेन विवृत्यते। पश्यन्ती-मध्यमा-वैखरीः व्याकरणस्य पदप्रकृत्योः विषयत्वेन स्वीक्रियन्ते।[x] केषाञ्चिन्मते वाचस्त्रैविध्यमेवाङ्गीक्रियते परायाः साक्षाद् अनुल्लेखात्। परञ्च नागेशः तन्त्रकारिकामुद्धरति चातुर्विध्यविषये-

परा-वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।

हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा॥

तन्त्रागमे वाच: स्वरूपम् अन्यदर्शनापेक्षया विशेषतया सुस्पष्टतया व्याख्यातम्। तन्त्रसारे वर्णोदयसिद्धान्त: वर्णित:। परमशिवस्य तिस्र: शक्तय:- अनुत्तर-इच्छा-उन्मेष इति। अस्य त्रितयस्य आनन्द-ईशन-ऊर्मि इति क्रमश: विश्रान्तिस्थलम्। अ इ उ इत्येते परामर्शाभिधायिन: सन्ति।[xi] एवं क्रियाशक्तेराम्भ:। अयं समस्तोऽपि प्रत्यवमर्श: परावाक्-समुद्भूत: वर्त्तते। इमा: शक्तय: क्रमश: इच्छा-ज्ञान-क्रिया:, परा-परापरा-अपरा:, पश्यन्ती-मध्यमा-वैखर्य इत्यादिनामभिरपि ज्ञायन्ते। इमा एव सृष्टिस्थितिलयतुर्ये च द्वादश भवन्ति।[xii]

स्वस्मादभिन्नस्य विश्वस्य परामर्श: शब्दाभिधायीति। विमर्शश्च परावाग्रूप:। यश्च नादात्मक:। आमर्श: परनादगर्भ: भवति। परनाद एव परावागुच्यते।

प्रस्तूयते संक्षेपेणात्र वाग्भेद: -

| प्रकाशांश: | विमर्शांश: | वाक् | मातृका | स्थिति: | वंशवृक्ष: | तत्त्वानि | प्रतीति: |
|---|---|---|---|---|---|---|---|
| अम्बिका | शान्ता | परा | सूक्ष्मतरा | कारणबिन्दु: | भूमि: | परमशिव: | परासंवित् |
| वामा | इच्छा | पश्यन्ती | सूक्ष्मतरा | कार्यबिन्दु: | गुच्छसमुद्भवा वल्ली | सदाशिव: | संवेदनम् |
| ज्येष्ठा | ज्ञान | मध्यमा | सूक्ष्मा | नादरूपबिन्दु: | सौरभ: | ईश्वर: | स्पन्दनम् |
| रौद्री | क्रिया | वैखरी | स्थूला | बीजरूपा | अक्षमाला | शुद्धविद्या | वचनम् |

शाक्ततन्त्रे भगवान् अनुत्तर: कुलेश्वररूप: वर्त्तते। अस्य कौलिकीशक्ति: विसर्ग: पराशक्तिरेवास्ति। स्वरा: बीजानीति उच्यन्ते। बीजयोन्यात्मकं सूक्ष्मस्थूलानन्दोदयक्रमे आदि-क्षान्तो भगवान् परमशिव एवास्ति।

शाक्ते शिव: प्रकाशस्वरूप: शक्तिश्च विमर्शस्वरूपा स्फूर्तिरूपिणी स्त:। उभयोरैक्यं बिन्दुरूपेण वर्तते। शक्त्या: शिवानुप्रवेशेन बिन्दु: संवर्द्धते। बिन्दुनादौ सम्मिल्य मिश्रबिन्दुरूपेण परिणततां गच्छत:। अयमेव योग:

काम इति निगद्यते। परावाक् बिन्दुतत्त्वस्य अध्यात्मरूपं वर्त्तते। अस्या एव पश्यन्त्यादीनां कार्यबिन्दूनामभिव्यक्तिः संभवति, र व इत्यपि कथ्यते।[xiii] अम्बिकाशान्ता इत्येतयोः सामरस्येन वामा-ज्येष्ठा-रौद्रीति (इच्छा-ज्ञान-क्रिया) शक्तीनां विकासो भवति। आख्यान्तररूपेण पूर्णागिरि-जालन्धर-उड्डीयानपीठा इति विज्ञायन्ते। इमा एव क्रमशः पश्यन्ती- मध्यमा-वैखरीः वाचः स्वरूपं कथयन्ति।[xiv]

निस्पन्दो रवात्मकं शब्दब्रह्म विवक्षोत्पन्नप्रयत्नेन शारीरवायुना नाभिमागत्य मनोमात्रविमर्शेन युक्तः सन् अ,क आदिवर्णविशेषशून्ये, स्पन्दात्मके, प्रकाशमात्ररूपेण कार्यबिन्दुः पश्यन्तीवाक् उद्भवति।[xv]


रवात्मकं ब्रह्म पश्यन्तीरूपमाधाय वायुना प्रेरितः हृद्देशं प्राप्तः सन् बुद्ध्या अ,क आदिवर्णविशेषसहितं सस्पन्दं मध्यमा-वाक्-रूपेण प्रकाशते। रवात्मकं ब्रह्म वायुप्रेरितं सन् वक्त्रं प्राप्य कण्ठताल्वादिस्थानेषु, संस्पृष्टवता श्रोत्रगम्येन भूय अ, क, च, आदिवर्णैः बीजात्मकी वैखरी वागभिव्यज्यते।[xvi]

अनुभवातीतबिन्दुना त्रिगुणारूपाशक्तेः एकेन त्रिकोणेन प्रदर्शनं क्रियते।

अ = शब्दब्रह्म

ब = नादः क्रियाबिन्दुर्वा

स = बीजम्




तन्त्रपद्धतिर्यथा साधनायै प्रसिद्धा तथैवात्र वाचः साधना अपि साधिता। न चान्तरेणेममागमशास्त्रं क्वचित् साधनत्वं प्रदर्शितम्। शाक्तञ्च साधनायै प्रसिद्धम्। कामः कला च द्वौ शब्दौ अवधेयौ- बिन्दुनादयोः सम्मिश्रितबिन्दुनि परिवर्त्तनमेव कामः, एकस्मिन् त्रिकोणे एकः बिन्दुः प्रकाशः, अन्यश्च विमर्शः तर्हि एतयोः संयोगजः कामः रविर्वा मिश्रबिन्दुः उदेति। अग्निचन्द्रौ कामस्य कलात्वेन अवतिष्ठतः। गन्धर्वतन्त्रे कामकलायाः त्रैरुप्यं प्रसिद्धम्- स्थूल-सूक्ष्म-मन्त्र इति।

शाक्तसाधनाया मुख्यतः तत्त्वद्वयमस्ति- आचारः भावश्च। आचारेण दिव्य-पशु-वीरभावान् साधकः प्राप्नोति।

भारतीयज्ञानपरम्परायां चिह्नानामतीव महत्त्वं वर्त्तते। वयं पश्यामः वेदेषु प्रचुरमात्रायां ज्ञानाय उपलक्षणस्य प्रयोगः क्रियते। परञ्च तेषामर्थं वात्त्मानिकशया गृह्येच्चेद् वेदविनाशाय तदर्थघातक एव। तेन लोके ज्ञानानुरागिणः विज्ञानं न गन्तुं पारयन्ति। अत एव तेषामर्थः शास्त्रानुसारेण उत तद्गुणानुसारेण गृह्यते। अन्यथा

हिंसावारका अपि हिंसां प्रत्युन्मुखीभूता: दरीदृश्यन्ते। तथैव अस्यां साधनापरम्परायां लाक्षणिकशब्दानामपि प्रयोग:।

साधनाया: पञ्चतत्त्वानि पञ्चमकाराख्यया अपि ज्ञायन्ते।[xvii]

**मद्यम्-** येन मायाजालादिनां तत्त्वानामुशमनं भवति। तेनाष्टविधदु:खमुक्ति:। अत्र मद्यं शक्तिरसोद्भूतं तत्त्वम् अस्ति। षट्चक्रभेदनसमर्थानां योगिनां मूलाधारे स्थितां कुण्डलिनीशक्तिं जागरित्वा सहस्रारे परमशिवेन सह ऐक्यं सम्भवति। शिवशक्तिसामरस्येन सहस्रारपद्मस्थित-चन्द्रमण्डलादमृतधारा क्षरति। तदामी अमृतधारा शक्तिरसोद्भवा मद्यतत्त्वमिति। [xviii] उन्मनात: आकाशकमलपर्यन्तं य: सर्वदा मकरन्ददुधापाने रत: स मद्यपायीत्युच्यते।[xix]

**मांसम्-** मांसमिति पदेन शिव: ज्ञेय:। रुद्रयामले शक्ति: सुरा, शिवश्च मांसम्। अत एतयो सामरस्यं मोक्षम्। येन मांगल्यमुत्पाद्यते, संविदि आनन्दोऽनुभूयते।[xx] मांसशब्दे मा + अंस इति द्वौ शब्दौ। मा इति रसनार्थे, अंशश्च रसोद्भूता वाक्। एवं य: मांसमत्ति स सदा संयतवाचा वाक्यं प्रयुंक्ते। संयतवाग्मी साधक: मांससाधक: कथ्यते।[xxi]

**मत्स्य:-** मनसा सहितानि सर्वाणीन्द्रियाणि संयुज्य य: परमात्मनि योजयेत् स मत्स्यभोजी साधक इति।[xxii] गंगायमुनयो: द्वौ मत्स्यौ सदा विचरत:। ईळा- पिंगले द्वे नाडी गंगायमुने।[xxiii]

**मुद्रा-** तन्त्रशास्त्रे आशा- तृष्णा- जुगुप्सा- भ्रम- विशद- घृणा- मान- लज्जा- अभिषंग- भेदात् मुद्राष्टविध:। सत्संगे मुक्ति:। असत्संगपरित्यक्ता मुद्राख्या। सहस्रारपद्मे स्थितस्यात्मन: स्वरूपं सूर्यरूपता, तेजोमयिता, चन्द्ररूपता, शीतलता चेति। स आत्मा महाकुण्डलिनीशक्त्या सह संयुक्तो भवति। अस्य ज्ञानस्याधिकारी मुद्रासाधक: वर्त्तते।

**मैथुनम्-** बिन्दुरूपिशिवेन सह कुण्डलिनीशक्ते: सम्बन्ध: मैथुनमुच्यते। इदं सृष्टिस्थितिसंहाराणां कारणस्वरूपम्। यत: शिवशक्तिसंगतिरेव सृष्टिकारणम्।[xxiv]

जीवशिवयोरभिन्नभाव: मोक्षप्राप्तिश्च परमलक्ष्यम्। एषां सेवनेन साधक: परमात्मनि लीयते।[xxv]

कुण्डलिनी ब्रह्ममयी महाशक्तिः, अत्र साधनाविषय: वर्त्तते। अत्र साधनां साधनाय अनेकानि अङ्गानि सन्ति यथा- पूजा-प्रतिमा-मन्त्र-जप-यन्त्र-मुद्रा-ध्यान-संस्कारादय:। अथापि बहिर्याग-जप-अन्तर्यागा इति साधनाया: रूपत्रयं विद्यते।

**सारांश:-**

साधना शाक्ततन्त्रस्य मुख्य: विषयो वर्त्तते। साधनायाश्च शक्तिरिति। शक्ते: पूजाराधनोपासना: मुख्यविषयत्वेन अङ्गीक्रियन्ते। मन्त्रजपनादपूजोपासनाद्यतिरिक्ता अपि सन्ध्याव्रततपांसि पुरश्चरणमुद्राध्यान-संस्कारदीक्षायज्ञादयोऽपि साधनाया: विषया: सन्ति। सामान्येनैषामाधार: वाक्तत्त्वं वर्त्तते।

**सन्दर्भग्रन्थसूची**


- अभिनवगुप्तः, *तन्त्रालोकः*, परमहंसमिश्रः, सम्पूर्णानन्द संस्कृत वि. वि., वाराणसी,१९९९
- अभिनवगुप्तः, *तन्त्रसारः*, परमहंसमिश्रः, शक्तिप्रकाशन, वाराणसी, १९९५
- अवस्थी, शिवशङ्करः, *मन्त्र और मातृकाओं का रहस्य,* चौखम्बा विद्याभवन, वाराणसी, १९८६
- उपाध्याय, बलदेव, *भारतीय दर्शन,* शारदा मन्दिर, वाराणसी,२०११
- उमाशंकर, *सर्वदर्शनसंग्रहः,* चौखम्बा विद्याभवन, वाराणसी,२०१२
- कविराजः, गोपीनाथः, *तान्त्रिकवाङ्मय में शाक्तदृष्टि,* बिहार राष्ट्रभाषा परिषद्, पटना, १९६३
- दाश, अच्युतानंद, त्रिपाठी, राधावल्लभ, *डॉ. अच्युतानन्द दाश स्मृति: निगम तथा शैव-शाक्त-वैष्णव आगम परम्पराओं का अन्त: संबन्ध,* न्यू भारतीय बुक कॉरपोरेशन, 2010
- द्विवेदी, श्यामाकान्तः, *भारतीय शक्तिसाधना: स्वरूप एवं सिद्धान्त,* चौखम्बा सुरभारती प्रकाशन, वाराणसी,२०१२
- पुण्यानन्दः, *कामकलाविलास:* (नटनानन्दकृता संवलिता चिद्वल्ली)
- भास्कररायमखी, *वरिवस्यारहस्यम्,* श्यामाकान्तद्विवेदी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००५
- वामदेवः, *वाक्यपदीयम्, ब्रह्मकाण्ड,* कृष्णदाससंस्कृतसीरीज, कृष्णदास अकादमी, वाराणसी, १९८७
- शास्त्री, मुकुन्दराम*, ईश्वरप्रत्यभिज्ञाविमर्शिनी,* काश्मीर संस्कृत सीरीज, श्रीनगर, १९१८, १९२१

## सन्दर्भसूची

---

[i] यावद् ब्रह्म विष्ठितं तावती वाक्। ऋग्वेदसंहिता 10/114/8

[ii] तस्य भावस्त्वलौ, पाणिनीय अष्टाध्यायी 5/1/119

[iii] देवीं वाचमजनयन्त देवास्तां विश्वरूपा: पशवो वदन्ति।

सानो मन्द्रेषमूर्जं दुहानाधेनुर्वागस्मानुप सुष्टुतैतु॥ ऋग्वेदसंहिता 8/89/11

[iv] वागेव विश्वा भुवनानि जज्ञे वाच इत् सर्वममृतं यच्च मर्त्यम्।

अथेद्वाग्बुभुजे पुरुत्रा वाचो न परं यच्च नाह॥ शतपथब्राह्मणम् 6/5/3/4

[v] ऋग्वेदसंहिता 3/8/10/58

[vi] महाभाष्यस्य उद्योतव्याख्यायां कारिकेयं प्राप्यते- स्वरूपज्योतिरेवान्त: परावागनपायिनी। तस्यां दृष्टस्वरूपायामधिकारो निवर्त्तते॥

[vii] ऋग्वेदसंहिता 2/3/22

[viii] वाक्यपदीये ब्रह्मकाण्डे 130

[ix] अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्त्ततेऽभावेन प्रक्रिया जगतो यत:। वाक्यपदीये ब्रह्मकाण्डे 1

[x] वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्। अनेकतीर्थभेदाया: त्रय्या: वाच: परं पदम्॥ वाक्यपदीये ब्रह्मकाण्डे 142

[xi] तन्त्रसार: तृतीय आह्निकम्

[xii] तस्य शक्तय: एवैतास्तिस्रो भान्ति परादिका:। सृष्टौ स्थितौ लये तुर्ये तेनैता द्वादशोदिता: ॥

[xiii] स र व: श्रुतिसम्पन्नै: शब्दब्रह्मेति गीयते। कामकलाविलासे सरोजिनीटीका, पृष्ठ 35

[xiv] कामकलाविलास:

[xv] कामकलाविलासे कामकलाविलासे सरोजिनीटीका, पृष्ठ 35

[xvi] कामकलाविलासे कामकलाविलासे सरोजिनीटीका, पृष्ठ 36

[xvii] मद्यं, मांसं, मत्स्य:, मुद्रा, मैथुनम् इति। कुलार्णवतन्त्रम् 5/113, 108, 110

[xviii] सोमधारा क्षरेत् या तु ब्रह्मरन्ध्रात् वरानने। पीत्वानन्दमय: स्वां य: स एव मद्यसाधक:॥ कौ. र. पृ. 255

[xix] व्योमपंकजनिष्यन्दसुधापाने रतो नर:। सुधापानमिदं प्रोक्तमितरे मद्यपायिन:॥ कुलार्णवतन्त्रम्, 5/108

[xx] मांगल्यजननाद् देवि संविदानन्ददानत:। सर्वदेवप्रियत्वाच्च मांसमित्यभिधीयते॥ कुलार्णवतन्त्रम्, 17/69

[xxi] मा शब्दाद् रसना ज्ञेया तदंशान् रसनाप्रियान्। सदा यो भक्षयेद्देवि स एव मांससाधक:। कौ. र. पृ. 255

[xxii] मनसा चेन्द्रियगणं संयम्यात्मनि योजयेत्। मत्स्याशी स भवेद् देवि! शेषा: स्यु; प्राणिहिंसका:। कुलार्णवतन्त्रम् 5/110

[xxiii] गंगायमुनयो: द्वौ मत्स्यौ सदा विचरत:। तौ मत्स्यौ भक्षयेद् यस्तु स भवेन्मत्स्यसाधक:॥ कौ. र. पृ. 255

[xxiv] मैथुनं परमतत्त्वं सृष्टिस्थित्यन्तकारणम्। मैथुनाज्ज्ञायते सिद्धिर्ब्रह्मज्ञानं सुदुर्लभम्॥ कौ. र. पृ. 255

[xxv] All things spring from and are at base Ananda or Bliss whether it is perceived or not. The latter, therefore, exists in two forms; as Mukti which is Anandasvarupa or transcendent, unlimited one, and as Bhukti or limited worldly bliss. Tantrika Sadhana claims to give both, because the one of dual aspect is both. The Vira thus knows that Jivatma and Paramatma are one; that it is the One Shiva who appears in the form of the multitude of men and who acts, suffers and enjoys through them. (Woodruffe 1959: pp 398-399)